International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(4): 99-102
© 2016 IJSR
www.anantaajournal.com
Received: 19-05-2016
Accepted: 20-06-2016

**Avnish Kumar**
Assistant Professor, Department of Sanskrit, Hansraj College, University of Delhi, Delhi-110007, India.

**Correspondence**
**Avnish Kumar**
Assistant Professor, Department of Sanskrit, Hansraj College, University of Delhi, Delhi-110007, India.

# फिल्मोरस्य भाषिकचिन्तनं संस्कृतञ्च
# Fillmore's linguistic speculations and Sanskrit

**अवनीश कुमार**

आदिकालत एव भारतभुवि भाषाचिन्तनस्य परम्परा प्रचलतीति प्रभूतप्रमाणप्रसिद्धं तत्त्वमधुना। भारतभुवीव पाश्चात्यजगत्यपि भाषाचिन्तनस्य गरीयसी काचन परम्परा वर्तत इत्यपि सिद्धमेव। भाषाविज्ञानाभिधं यदाधुनिकं शास्त्रं सर्वत्र प्रवर्तमानं प्रथमानं चास्ति सोसूरं (F. Saussure, 1857-1913) तस्य जनकं वदन्ति तज्ज्ञाः। श्रीसोसूरो मनोविज्ञानं समाजविज्ञानं चाश्रित्य भाषातत्त्वं विमृष्टवानिति विदितमेवास्ति सर्वेषाम्। सोसूरानन्तरम् आधुनिकभाषाविज्ञानेऽनेके सिद्धान्ताः समुदिता विकासमाप्ताश्च। तेषु सिद्धान्तेषु संरचात्मकभाषाविज्ञानस्य (Structural Linguistics) सिद्धान्तः शिरोमणिस्थानं भजत इत्यत्र नास्ति कस्यचन संशीतिः। सोऽयं भाषासिद्धान्तविशेषः श्रीब्लूमफील्डस्य (L. Bloomfield, 1886-1949) चिन्तने लब्धाकारस्त-च्छिष्यप्रशिष्यैश्च (हाकिटः, फ्रीजः, नाइडा, हैरिसः, हिलः इत्यादिभिः) प्राप्तप्रसरोऽद्यापि भाषातत्त्वेऽधीतिनामध्ययनमननविषय इति तत्त्वमेव खल्वस्य महिमानं ब्रूते परमम्।

1957 तमे वर्षे नोम चॉम्स्कीमहोदयस्य (N. Chomsky, 1928-) 'Syntactic Structures' इत्यभिधो ग्रन्थः प्रकाशमागतः। अस्य ग्रन्थरत्नस्य प्रकाशनेन सममेव अमरीकीभाषाविज्ञाने नूतनं किञ्चनैकं युगमारब्धम्। चॉम्स्कीर्महामनस्वी रूपान्तरकप्रजनकव्याकरणम् (Transformational Generative Grammar) प्रास्तौत्। सोऽयं भाषातत्त्वविदां वरो गच्छता कालेन स्वकीयान् सिद्धान्तान् परिवर्त्य प्रस्तुतवाननेकधेति जानाति भाषातत्त्वविचारलग्नो विदुषां समुदायः।

चॉम्स्कीकल्पनाप्रकल्पिते रूपान्तरणव्याकरणप्रस्थाने समीक्षाप्रेक्षावन्तोऽनेकान् दोषानन्वभवन्। तान् दोषानपाकर्त्तुं 'कारकव्याकरणाभिधं' (Case Grammar, 1968) व्याकरणप्रस्थानं प्रादुरभवदिति विदितमस्ति भाषातत्त्वविचारप्रत्तमतीनां सुमतीनाम्। कारकव्याकरणप्रस्थानस्य प्रवर्तकः श्रीफिल्मोरः (C.J. Fillmore, 1929-2014) पाणिनीयतन्त्रे वार्तिककार इव रूपान्तरणव्याकरणतन्त्रे उक्तानुक्तदुरुक्तानां विचारं प्रसारयति। विगतवर्षे एव दिवमुपयातः सोऽयमाचार्यमूर्धन्यः स्वकीयसिद्धान्तान् संशोध्य कारकव्याकरणं बहुकृत्वः परिमृष्टवान्। कारकव्याकरणं प्रस्तोतुमनसा श्रीफिल्मोरेण स्वकीया उद्भावना कतिपयेषु शोधलेखेषु मुखरीकृताः। तेष्वमी शोधनिबन्धा विशेषेणोल्लेखमर्हन्ति-

Towards a modern theory of case, 1966
The case for case, 1968
Some problems for case grammar, 1971
The case for case reopened, 1977.

कारकव्याकरणस्य कर्त्तुर्विवरणानुसारं वाक्यस्य विश्लेषणं :-
'वाक्यम् = प्रकारता + प्रतिज्ञप्तिः', इत्येवंविधमस्ति।
अत्र प्रकारतायाः तात्पर्यं पूर्णवाक्यीयतत्त्वमस्ति। तदेवं- निषेधत्वम्, प्रश्नत्वम्, वाच्यम्, कालः, क्रियाभाव इत्यादयः प्रकारताः सन्ति।[1] अथ चैतदतिरिक्तं यत्किमपि तत्त्वजातं वाक्येऽवशिष्टं तत्सर्वं प्रतिज्ञप्तिं ब्रवीति

1 This latter will include such modalities on the sentence as a whole as negation, tense, mood and aspect. The case for case, C.J. Fillmore, 1968, p. 23.

श्रीफिल्मोर:। प्रतिज्ञप्तौ नामपदानां क्रियापदानाञ्च मिथः सम्बन्धः स्वीक्रियते।[2] वाक्यस्य संरचनायां काचनैका क्रिया एकमनेकानि वा नामपदानि भवन्ति। एतानि नामपदानि क्रियया सह केनचन सम्बन्धविशेषेण संयुक्तानि भवन्ति। त एवैते सम्बन्धाः कारकपदेनाभिहिता भवन्ति। श्रीफिल्मोरो भाषाया बाह्याभ्यान्तरपक्षयोर्भेदं स्पष्टीकृत्य तं विशदीकृतवान्। स हि कारकाणां स्थितिं अन्तःसंरचनायां मनुते। सः कारकसम्बन्धान् तु विश्वस्य सर्वास्वपि भाषासु पश्यति परं कारकरूपाणि (Case forms/surface cases) भाषासापेक्षाण्येव दृक्पथमवतरन्तीति तस्य दृष्टिः।

कारकव्याकरणकारः कारकाणामनेकविधत्वं व्यवस्थापयति। भाषायां प्रयोगवैविध्यमन्वीक्षणपरः सः तद्विमर्शधिया कारकाणां लक्षणं चासकृत् संशोधितवान् संख्याश्च परिवर्त्तितवान्। तथाहि-

प्रकर्त्ता (agent)] अनुभवकर्त्ता (experiencer)] करणम् (instrument or cause), कर्म (object or patient), स्रोतः (source), लक्ष्यम् (goal), स्थानम्/अधिकरणम् (place/location), समयः (time) इत्यादितत्त्वं स कारकतया प्रास्तौत्।

**प्रकर्त्ता (agent)** क्रियायाः प्रवर्त्तकः (instigator) प्रकर्त्तृरूपेण स्वीकृतः श्रीफिल्मोरेण। स च चेतनोऽपि (+ animate) भवेत्।[3] (i) सेवकः पतति (ii) पुस्तकं पतति, इत्युदाहरणद्वयेन तावत् तत्त्वमिदमवगन्तुं यतामहे। अत्र प्रथमे वाक्ये पतनक्रियायाः प्रवर्त्तकः सेवकः अस्ति। प्रवर्तकस्य चेतनत्वादत्र 'सेवकः' पदे प्रकर्त्तृत्वं प्रसिध्यति। परमपरस्मिन् वाक्ये 'पुस्तकं' इत्येतद् यत्पदमस्ति तस्य प्रकर्तृत्वमप्रसिद्धम्, अचेतनत्वात् तस्य। तस्मादत्र वाक्ये तस्योपस्थितिः कर्मत्वेनैवावमन्तव्या। न हि स कदापि प्रकर्त्तृत्वमर्हति। फिल्मोरेण विवक्षा न स्वीकृता। कैश्चन संस्कृतवाक्यैः प्रकर्त्तुः स्वरूपमवगन्तुं शक्यते-

1. गुरुः छात्रं ताडयति।
2. दण्डः छात्रं ताडयति।
3. गुरुः छात्रं दण्डेन ताडयति।
4. छात्रः गुरुणा ताड्यते।
5. गुरुः ताडनाय दण्डं योजयति।

एतेषां वाक्यानां संरचनाविशेषः स्फुटतरं प्रमाणयति शब्दानां बाह्यसंरचनात्मकसम्बन्धैः (Subject, object) कारकाणां यथायथं व्याख्या न भवितुं शक्नोतीति। उक्तेषु वाक्येषु प्रथमे तृतीये चतुर्थे पञ्चमे वाक्ये रेखाङ्कितपदे प्रकर्तृत्वमस्ति। परम् द्वितीये वाक्ये दण्डः प्रकर्तृत्वं न अर्हति परं बाह्यसंरचनायां तु स उद्देश्यभूत एवात्रोपतिष्ठति। तस्माद्बाह्यसंरचनात्मसम्बन्धाः कारकत्वं न निर्धारयन्तीति निर्णयत्याचार्यः कारकव्याकरणकारः। अनयोर्वाक्ययोः स्वरूपं पश्यन्तु-

सैनिकः शत्रून् हन्ति।
क्षयरोगः रोगिणं हन्ति।

अत्राद्यवाक्यगतः 'सैनिकः' प्रत्यक्षं प्रकर्त्तृकारकरूपः परमनुवर्तिवाक्यगतः 'क्षयरोगः' न प्रकर्त्तृकारकरूपः। क्षयरोगस्त्वत्र करणकारकत्वेन प्रयुज्यमानोऽस्ति। 'सैनिकः', 'क्षयरोगः' द्वे अपीमे पदे अत्रोद्देश्यभूते स्तः। तदिदमुद्देश्यं फिल्मोरो बाह्यसंरचनाविषयमङ्गीकरोति।

**अनुभवकर्ता (Experiencer)** स योऽनुभवति, यः कार्यप्रभावं संवेत्ति, य उपभुङ्क्ते। यः संवेदनामनुभवति सोऽनुभावक[4] इति भणति श्रीफिल्मोरः। यत्र मानसिकी काचन क्रिया लक्ष्यते तत्रानुभवकर्ता प्रवर्तते[5] इत्यस्य मतिः। तदिदं तत्त्वमेभिर्वाक्यैर्निर्णेतुं शक्यते-

6. अहं शैत्यमनुभवामि। (I am warm)[6]
7. सोहनः प्रसन्नोऽस्ति। (John is happy)
8. सः जिघ्रति पुष्पम्। (Bill smelt the bacon first)
9. सा चिन्तयति। (It seems to me)
10. बालकः बिभेति। (The noise frightened me)
11. सा स्पृहयति। (John loves Mary)

श्रीफिल्मोर आंग्लभाषायाः 'hear, listen', इत्यनेन क्रियाद्वयेन प्रकर्त्रनुभवकर्त्रोर्भेदं स्पष्टीकरोति।

I hear him [— O + E]
I listen to him [— O + A]

अत्र 'hear' इत्यनया क्रियया यः सम्बद्धः सोऽनुभवकर्त्ता। यस्तु 'listen' इत्यनया क्रियया सम्बद्धः स प्रकर्ता इति कारकव्याकरणकाराभिप्रायः।

**करणम् (Instrument or cause)** यः (वलम् पदार्थो वा) क्रियानिर्मितिमुपकुर्वत् तत्त्वं करणकारकं भवति। अचेतनस्यापि तथा करणत्वं प्रसिध्यत्येव। अधस्तनेनोदाहरणगणेन तत्त्वमिदं प्रमाणितं तिष्ठति-

12. छात्रः कलमेन लिखति। (John opened the door with the key)
13. छात्रः लेखनाय कलमं प्रयुङ्क्ते। (John used the key to open the door)
14. कलमेन लिख्यते।
15. माता छुरिकया फलं छिनत्ति। (Mother cuts fruits with a knife)
16. छुरिका छिनत्ति स्वयमेव। (The knife cuts by itself)

श्रीफिल्मोरेण अव्यवहितं कारणं (immediate cause) करणमुक्तम्।[7] स्पष्टार्थं तेनैका प्रक्रियोदाहृता-

17- i. The man broke the window.
ii. The baseball broke the window.
iii. The man broke the window with the baseball.
iv*. The bat broke the window.
v*. The man broke the window with the baseball bat.

तदेवमेतत्तत्त्वं विवरिषुः श्रीफिल्मोरः प्रकर्तारं प्रधानकारणं मन्वानः करणमव्यवहितकारणं ब्रूते। अस्यां प्रक्रियायां 'baseball bat' इत्ययं करणरूपेण प्रयोक्तुरिच्छा फिल्मोरेणास्वीकृता, यथा चतुर्थं पञ्चमं वाक्यम्।

2 The proposition, a tenseless set of relationship involving verbs and nouns... The case for case, 1968, p. 23.

3 The case of the typically animate perceived instigator of the action identified by the verb. The case for case, C.J. Fillmore, 1968, p. 24

4 The case of the animate being affected by the state or action identified by the verb. The Case for Case, 1968, p. 24

5 Where there is a genuine psychological event or mental state verb, we have the experiencer. Some problems for case grammars, 1971, p. 42

6 आंग्लभाषाया उदाहृतानि वाक्यानि संस्कृतभाषाया वाक्येभ्यो भिन्नानि भवितुं शक्नुवन्ति नानुवादत्वात्।

7 Some Problems for Case Grammar, 1971, p. 43

**कर्म (Objective or content or patient)** अर्थदृष्ट्या कारकेषु कर्म सवाधिकं तटस्थं कारकं भवतीति मतमभिव्यनक्ति श्रीफिल्मोरः। क्रियाया व्यापारे क्रियागम्यायां वावस्थायां यस्य भूमिकानिर्वोढ़त्वं प्रसिध्यति तन्नामपदं कर्मकारकं भवति। भूमिका चाथास्यार्थीविश्लेषणेनावगम्यते।[8] क्रियाया व्यापारेण तदवस्थया यद्यत्प्रभावितं भवति यद्यत्परिवर्तितं भवति यद्यद्वा विकारभावमाप्नोति तत्तत्सर्वं कर्मकारकपदभाग्भवतीत्यभिप्रैति कारकव्याकरणकारः।[9] अन्यकारकैरवशिष्टानि नामपदानि कर्मकारके स्वीकृतानि। तेनेदं 'wastebasket' इत्युक्तम्। यथा 'it rains' इत्यत्र 'it' इति पदस्यार्थो विमृश्यताम्। वाक्येऽस्य स्वरूपं किमस्तीति न स्पष्टम्। कर्मातिरिच्य फिल्मोरप्रतिपादितेषु कारकेषु न केनाप्यस्य व्याख्यानं सम्भवति। तस्मादस्माकमाचार्यः 'it' इति पदमत्र कर्मकारकं कृत्वा पश्यति। देवः वर्षति, पर्जन्यः वर्षति, नदी वहति इत्यादिषु संस्कृतवाक्येषु 'देवः', 'पर्जन्यः', 'नदी' इत्यादीनि पदानि कर्मकारकाणि न तु कर्तृकारकाणीति पर्यवसितं भवति कारकव्याकरणतन्त्रे। 'The story is true' इत्येतच्च यदाङ्ग्लवाक्यमस्ति, अत्र 'The story' इति पदं कर्मकारकमस्ति न तु कर्तृकारकम्। अन्यान्युदाहरणानि सन्ति–

18. रामः पत्रं पठति।
19. स कपाटं उद्घाटयति।
20. सा पुष्पेभ्यः/पुष्पं स्पृहयति।
21. कुण्डलं करोति।
22. वनं छिनत्ति।
23. ग्रामं दहति।

**स्रोतः (Source)** तत् तत्त्वं यतः किमपि वस्तु निर्दिश्यते तत्स्रोतः कारकम् भवति। श्रीफिल्मोरेण एतत् आरम्भस्थलं (starting point) उक्तम् तात्पर्यमिदं यतः क्रिया प्रारभ्यते तत्स्थलं स्रोतः कारकम् भवति। तेन गत्यर्थकक्रियाविषय इदं उपस्थापितम्। तेनोदाहृतम्– He went from the top of the hill to the cemetery gate. go, come, move एतादृशी गत्यर्थकक्रियासु आरम्भिकस्थलं बोधायास्य कारकं प्रयुङ्क्ते श्रीफिल्मोरः। रूपान्तरणबोधकक्रियासु पूर्वस्थितिः (earlier state) विशिष्यते कारकेणानेन यथा He changed from a 96 pound wreaking into a famous football hero. फिल्मोरस्य कथनमस्ति यत् भिन्नेषु वाक्येषु कारकस्यास्य स्थितिः विधेयकप्रकारैः (types of predicates) निर्धारिता भवति। अस्य व्याख्या पूर्वस्थानं (earlier)] पूर्वस्थितिः (earlier states)] पूर्वकालिकसमयश्च (earlier time point) इत्येवं विधम् भवितुं शक्यते।[10]

24. वृक्षात् पत्रं पतति।
25. स नगरात् अयात्।
26. रामः कौशल्यायाः अजायत।
27. अद्यतः अवकाशोऽस्ति।

आंग्लभाषायाः go, come, move क्रिया विशुद्धा गमनक्रियाः सन्ति इति फिल्मोरेणोक्तम्। आभ्यः क्रियाभ्यो भिन्नाः गत्यर्थकक्रियाः व्याख्या सपेक्षा भवन्ति। एतस्यां स्थितौ कालिकस्रोतः (temporal source) स्थानिकस्रोतश्च (spatial source) जायेते स्पष्टार्थम् फिल्मोरेणोदाहृतम् आंग्लभाषायाम्– He walked from the top of the hill to the cemetery gate. He walked from noon until sundown.

**लक्ष्यम् (Goal)** तत् तत्त्वं यल्लक्ष्यीकृत्य वस्तु निर्दिश्यते, यस्मै वस्तु समर्प्यते तत् लक्ष्यकारकं भवतीति कारकव्याकरणमतम्। अत्र पदार्थस्य हस्तान्तरणं स्थानान्तरणं वा प्रतिपाद्यते। अस्मिन् हस्तान्तरणविधौ स्थानान्तरणविधौ वा यो वस्तुनो गन्तव्यमस्ति तत् लक्ष्यकारकमभिधीयते।[11] तथाहि–

28. ब्राह्मणाय गां ददाति। (He gave the book to her)
29. स विद्यालयं गच्छति। (He walked to school)
30. सोहनः प्रियायै पत्रं प्रेषयति। (I sent John a letter)
31. सोहनः नगरं/नगराय याति। (Sohan goes to the town)

अन्यानि वाक्यानि येषां बाह्यसंरचना भिन्नाः परं आन्तःसंरचना एका एव–

32. कामुकः/स दास्या धनं सम्प्रयच्छते। (A Lecher/he gives money to the maid servant)
32. स दास्यै धनं सम्प्रयच्छति। (He gives money to the maid servant)
32.* कामुकः दास्यै धनं सम्प्रयच्छति। (Lecher gives money to the maid servant)

क्रियायाः समापनं उत वा परिवर्त्तनं उत वा परिणामं रूपान्तरणं वा बोधाय लक्ष्यकारकं प्रयुङ्क्ते।[12] अनेन पूर्वं वर्णितं स्वकीयं परिणामकनाम्नः (resultative or factitive) कारकस्य अन्तर्भावः लक्ष्यकारके तेन कृतः। यथा–

33. कविः गीतं रचयति। (The poet composes a song)
34. सा पत्रं लिखति। (She writes a letter)
35. स भवनं निर्माति। (He constructed a bridge)

श्रीफिल्मोरेण संस्पर्शनक्रियाः[13] गत्यर्थवत् स्वीकृताः उदाहरणान्यांग्लभाषायाम्–

36. John hit the fence with his cane.
37. John pushed against the wall with his cane.
38. John dropped the dishes onto the floor.
39. I pushed the table in to the corner.

**अधिकरणम्/स्थानम् (Locative)** क्रियाया व्यापारस्य स्थितेर्वा य आधारस्तमधिकरणं ब्रूते श्रीमान् फिल्मोरः। इमान्युदाहरणवाक्यानि तदभिमतस्याधिकरणकारकस्य तत्त्वं विशदयन्ति–

40. कन्या उपवने तिष्ठति। (The girl sits in the garden)
41. कुक्कुरः मार्गे अस्ति। (The dog is on the road)

---

8 The semantically most neutral case, the case of anything representable by a noun whose role in the action or state identified by the verb is identified by the semantic interpretation of the verb itself; conversably the concept should be limited to things which are affected by the action or state identified by the verb. The case for case, 1968, p. 15

9 The object case is that of the entity which moves or which undergoes changes, and I still use as a wastebasket. Some problems for case grammar, 1971, p. 42

10 Some problems for case grammar, 1971, p. 41

11 Where there is a transfer of movement or something to a person, the receiver as destination is taken as the goal, 1971, p. 42

12 Some problems for case grammar, C.J. Fillmore, 1971, p. 45

13 Impinges (hit, push, drop etc.) इत्यनेन आंग्लपदेन याः क्रियाः वर्त्तन्ते तासां कृते 'संस्पर्शनम्' इति शब्दः उपकल्पते मया।

42. छात्रः विद्यालये आस्ते। (The student stays in the school)
43. दिल्लीनगरं उष्णमस्ति। (It is warm in Delhi/ Delhi is warm)
44. स समुदतटे क्रीडति। (He spent Sunday afternoon at the beach)
45. कुमारः राजभवने वसति। (The prince lives in the palace)
45.' कुमारः राजभवनं उपवसति/अनुवसति/अधिवसति

**समयः (Time)** समयस्य क्रियाप्रवर्तकत्वं साधयन् फिल्मोरः प्राक् तस्याधिकरण एवान्तर्भावमपश्यत्। परं गच्छता कालेन स एतं विचारं परित्यज्य समयस्य स्वतन्त्रकारकत्वं व्यवस्थापितवान् अत्रोदाहरणवाक्यानि–

46. छात्रः प्रातःकाले विद्यालयं गच्छति। (The student goes to school in the morning)
47. अद्य रात्रौ दशवादने कोलाहलोऽजायत। (There was a noise at ten at night today)
48. ह्यः स अत्र आसीत्। (He was here yesterday)
49. स नवतितमे दशके दिल्ल्यां वसति स्म। (He lived in Delhi in nineties)

**सम्बन्धः (Genitive case)** कारकव्याकरणकारः सम्बन्धं कारकं न मनुते। परमस्य बाह्यकारकत्वं तु तस्याभिमतमेव। एवं फिल्मोरमते सम्बन्धतत्त्वस्य विभक्तित्वमेव व्यवस्यति न कारकत्वम्। स हि विच्छेद्यसम्बन्धोऽविच्छेद्यसम्बन्धश्चेति सम्बन्धस्य प्रकारद्वयं प्रतिपादयति। अनयोः सम्बन्धयोः प्रतिपत्तिः प्रत्येकं भाषायां भिन्नैर्भिन्नैः प्रत्ययैर्जायत इति स आह। अमीभिरुदाहरणैरस्य सत्यत्वमवगन्तुं शक्यते–

| | | | |
|---|---|---|---|
| Surface 46. | a. | I have a dog | Alienable |
| | b. | My dog | |
| Surface 47. | a. | I have a head | Inalienable |
| | b. | My head | |

रामस्य पुस्तकम्।
कन्यायाः सौन्दर्यम्।
मधुनः माधुर्यम्।

इदमिहाकूतं यच्छ्रीमान् फिल्मोरो भाषाचिन्तनपरम्परायां कारकव्याकरणनाम्ना कामप्येकां नूतनां व्यवस्थां प्रास्तौदिति। तस्यायमायासो भाषायास्तत्त्वविमर्शे महतीमेकां सम्भावनां प्रस्फोटयति। परमयं विचारविशेषो भारतीयविमर्शदृष्ट्या न तथा नूतनम्, एतादृक्चिन्तनव्यवस्थायाः प्रागपि सत्त्वात्। तथाहि पाणिनिरष्टाध्यायीकारः कारकतत्त्वमतिसूक्ष्मं विचारयामास। पतञ्जलिर्भाष्यकारस्तदीयं दार्शनिकमतिगूढं च विमर्शं प्रतुष्टाव। अथ च भर्तृहरिर्वाक्यपदीयकारस्तद्विर्शं कामप्यतिप्रकर्षमुन्नतिं ददाविति सम्यग्जानन्ति भारतीयाभाषाविज्ञानविज्ञाः प्राज्ञाः।

भाषासु कारकतत्त्वस्य वास्तवं स्वरूपं किं, तस्याभिव्यक्तेर्व्यवस्थाः काः, तस्य विविधानि रूपाणि कानि, इत्यादिष्वेव प्रश्नेषु दीर्घकालं यावद् विचारपरोऽपि कारकव्याकरणकारो नैकेषु स्थलेषु निर्णयान् प्रस्तोतुं ना शक्नोत्। परं यदि संस्कृतव्याकरणपरम्परायाः कारकविमर्शमाश्रित्य फिल्मोरीयकारकव्याकरणस्य विश्लेषणं विदध्यात् तर्हि कारकव्याकरणस्य ताः रिक्तयः पूर्तिमाप्नुयुरित्येवास्ति मामकीनस्यास्य पत्रस्य निष्कर्षः। तत्र विवक्षा एव तावत् कारकस्य महत्तत्त्वम्। विवक्षात एव कारकाणि भवन्तीति मतं यद्युररीक्रियेत तदा कारकाणां लक्षणमपि स्थायि स्यात् तासां सङ्ख्यापि स्थिरतां भजेत। वाक्यपदीये सिद्धान्तितं भर्तृहरिणा यत् पदार्थेऽनेकाः शक्तयो भवन्ति परं वक्तुर्विवक्षा तासां शक्तीनामेकामेवैकसमयेऽभिव्यक्ति। वक्तुर्विवक्षा पदार्थस्य यां शक्तिं व्यक्तुमिच्छति वक्ता शब्दैः (वैखर्या वाचा) तामेव कारकरूपेण प्रस्तौति।

कारकत्वं सर्वभाषाव्यापि व्याकरणतत्त्वमित्याह फिल्मोरः। स हि क्रियास्वर्थवैभिन्न्यमङ्गीकृत्य कारकाणि स्पष्टीकुरुते। न केवलं परस्परमसम्बद्धानर्थान् वदत्सु क्रियापदेष्वेवार्थविभिन्न्यं भवति परं तन्मतानुसारं see, show इत्येतयोः die, kill इत्येतयोरेवंविधानामन्येषां सम्बद्धार्थक्रियाणामपि परस्परमर्थवैभिन्न्यमस्ति। तदर्थवैभिन्न्यमाश्रित्यैव कारकं प्रवर्तते इति तन्मतिः।

परं कारकाणां सार्वभाषिकत्वसंस्थापनाम् तेषामेतादृशः सूक्ष्मविभागो नैव विधातव्यः। तथाकरणे विभिन्नासु भाषासु क्रियाणामर्थवैभिन्न्यात् कारकत्वनिर्धारणे काठिन्यस्योदयात्, एकस्यां भाषायामपि क्रियास्वर्थभेदस्य सत्त्वात्कारकलक्षणसङ्ख्ययोरस्थैर्याच्च।

श्रीफिल्मोरः बाह्याङ्गिकक्रियासु मनोगोचरक्रियासु च वैभिन्नं स्वीकृत्य प्रकर्त्तारं अनुभवकर्त्तारं च स्वीकरोति। क्रिया यद्यनुमेया, 'क्रियानिष्पादकत्वं कर्तृत्वम्' इति लक्षणं भवेत् चेत् प्रकर्त्रनुभवकर्त्रोः भेदः न भवितुं अर्हति। वस्तुतस्तु कस्मिन्नपि पदार्थे कर्तृत्वं वक्तृविवक्षाधीनं भवति।

कारकाणां सार्वभाषिकत्वव्यवस्थापनविधौ तु विवक्षाया समधिकतरमितोऽपि माहात्म्यं प्रसिध्यति। कारकं हि नूनं भाषासामान्यव्यापि किञ्चन तत्त्वम्। तस्माद्विवक्षैव कारकव्यवस्थानिबन्धनप्रबन्धनहेतु यथार्थ व्याकरणवस्तु। फिल्मोरस्य कारकव्याकरणसम्प्रदायमस्तदेवात्मीकृत्य पूर्णतामियादित्यलमतिविस्तरेण वाग्विमर्श– समर्पितधियां सुधियां पुरतः।

**सन्दर्भग्रन्थाः लेखाश्च**


1. आधुनिकभाषाविज्ञान, भोलानाथ तिवारी, लिपि प्रकाशन, कृष्ण नगर, दिल्ली, 1978
2. भर्तृहरि का वाक्यपदीय, के.ए. सुब्रह्मण्यम् अय्यर, अनुवादक– रामचन्द्र द्विवेदी, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर, 1991
3. वाक्यपदीयम्, व्याख्याकारः– रघुनाथशर्मा, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 1997
4. Modern Linguistics, S.K. Verma, N. Krishnaswamy, Oxford University Press, Delhi, 1998
5. Sanskrit Syntax and the Grammar of Case B.S. Kumar, M.L.B.D., Delhi, 1977


**Fillmore's Articles**


- Towards a modern theory of case, 1996.
- The case for case, 1968.
- Some problems for case grammar, 1971.
- The case for case reopened, 1977.